# Anandasagarastava

# આનન્દસાગરસ્તવઃ

## Document Information

Text title : Anandasagarastava

File name : anandasagarastava.itx

Category : devii, otherforms, stotra, devI, nIlakaNThadIkShita

Location : doc_devii

Author : Nilakantha Dikshitar

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi, Rajani Arjun Shankar

Description-comments : Hymn to Devi Minakshi

Latest update : Dec. 18, 2009, February 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 17, 2023

*sanskritdocuments.org*

# આનન્દસાગરસ્તવઃ

વિજ્ઞાપનાર્હ-વિરલાવસરાનવાપ્ત્યા
 મન્દોદ્યમે મયિ દવીયસિ વિશ્વમાતુઃ ।
અવ્યાજભૂત-કરુણા-પવનાપવિદ્ધા-
 ન્યન્તઃ સ્મરામ્યહમપાઙ્ગ-તરઙ્ગિતાનિ ॥ ૧॥

આવેદ્યતામવિદિતં કિમથાપ્યનુક્તં
 વક્તવ્યમાન્તર-રુજોપશમાય નાલમ્ ।
ઇત્યર્થ્યસે કિમપિ તચ્છ્રવણે નિધાતું
 માતઃ પ્રસીદ મલયધ્વજ-પાણ્ડ્યકન્યે ॥ ૨॥

આક્રન્દિતં રુદિતમાહતમાનને વા
 કસ્યાર્દ્રમસ્તુ હૃદયં કિમતઃ ફલં વા ।
યસ્યા મનો દ્રવતિ યા જગતાં સ્વતન્ત્રા
 તસ્યાસ્તવામ્બ પુરતઃ કથયામિ ખેદમ્ ॥ ૩॥

પર્યાકુલે મનસિ વાચિ પરિસ્ખલન્ત્યા-
 માવર્તગર્ત ઇવ ચક્ષુષિ ઘૂર્ણમાને ।
કસ્તેઽભિધાસ્યતિ શિવે મમ તામવસ્થાં
 કાલે દયસ્વ કથયામિ તવાધુનૈવ ॥ ૪॥

ભક્તિં કરોતુ નિતરાં સુરજાતિમાત્રે
 ગ્રામીણજન્તુરિવ પૌરજનેષુ લોકઃ ।
અન્યત્ર દેવિ ભવદીય-પદારવિન્દા-
 દાકૃષ્યમાણમપિ મે હૃદયં ન યાતિ ॥ ૫॥

અઙ્ગીકુરુ ત્વમવધીરય વા વયં તુ
 દાસાસ્તવેતિ વચસૈવ જયેમ લોકાન્ ।
એતાવતૈવ સુકરો નનુ વિશ્વમાત-
 રુદ્દણ્ડદણ્ડધર-કિઙ્કરમૌલિભઙ્ગઃ ॥ ૬॥

વેદાન્તવાક્ય-જનિતં વિમલં વિચારૈ-
    રાસાદ્ય બોધમનુચિન્તનતોઽપરોક્ષમ્ ।
મુક્તિં વ્રજન્તિ મનુજા ઇતિ સૂક્તિમાદ્યા-
    માલમ્બ્ય કસ્તરિતુમર્હતિ શૈલકન્યે ॥ ૭॥

એકૈક-વેદવિષયાઃ કતિ નામશાખા-
    સ્તાસાં શિરાંસિ કતિ નામ પૃથગ્વિધાનિ ।
અર્થાવબોધ-વિધુરોઽક્ષરલાભ એવ
    કેષાં નૃણાં કતિભિરસ્તુ શરીરબન્ધૈઃ ॥ ૮॥

ન્યાયાઃ પરસ્પર-વિભિન્નદિશઃ સહસ્ર-
    મુચ્ચાવચાનિ ચ ભવન્ત્યુપબૃંહણાનિ ।
એવં સ્થિતે ગિરિસુતે નિગમોપલાનાં
    તાત્પર્ય-સારમવધારયિતું ક્ષમઃ કઃ ॥ ૯॥

અસ્ત્વક્ષરગ્રહ-વિધિર્જનુષાં સહસ્રૈ-
    રાપાતતો ભવતુ નામ તતોઽર્થબોધઃ ।
દુર્વાદિકલ્પિત-વિકલ્પ-તરઙ્ગસાન્દ્રાન્
    દુષ્પૂર્વપક્ષ-જલધીન્ કથમુત્તરેયુઃ ॥ ૧૦॥

બ્રહ્મેતિ શક્તિરિતિ બન્ધવિમોચનીતિ
    માયામયીતિ મદનાન્તક-વલ્લભેતિ ।
સમ્રાષ્ટશબ્દ-પરિવર્તનમાત્ર એવ
    સામર્થ્યમાવહતિ શાસ્ત્રપરિશ્રમોઽયમ્ ॥ ૧૧॥

તસ્મૈ પ્રસીદસિ ગિરીન્દ્રસુતે ય ઇત્થં
    સમ્પાદયેત શનકૈરપરોક્ષબોધમ્ ।
યસ્મૈ પ્રસીદસિ સ ચ ક્ષમતેઽવબોદ્ધુ-
    મિત્થં પરસ્પર-સમાશ્રયમેતદાસ્તે ॥ ૧૨॥

આકર્ણય ત્વમિમમભ્યુપગમ્ય વાદં
    જાનાતુ કોઽપિ યદિ વા હૃદયં શ્રુતીનામ્ ।
તસ્યાપ્યસઙ્ખ્ય-ભવબન્ધશતાર્જિતોઽયં
    દ્વૈતભ્રમો ગલતુ જન્મશતૈઃ કિયદ્ભિઃ ॥ ૧૩॥

કાલે મહત્યનવધાવપતન્કદાપિ

ક્વાપ્યન્તિમે જનુષિ કોઽપિ ગતિં લભેત ।
ઇત્થં સમર્થનવિધિઃ પરમાગમાનાં
પર્યાયસૂક્તિવિધયા નયનં નઞર્થે ॥ ૧૪॥

એકાપવર્ગસમયે જગતોઽપવર્ગઃ
સર્વાપવર્ગસમયે પુનરસ્તશઙ્કઃ ।
ઈદૃગ્વિધં કમપિ પક્ષમિહાવલમ્બ્ય
સ્થાતું સુખં ક્ષમમનેન પથા પ્રવૃત્તૈઃ ॥ ૧૫॥

અભ્યસ્ય વેદમવધાર્ય ચ પૂર્વતન્ત્ર-
માલક્ષ્ય શિષ્ટચરિતાનિ પૃથગ્વિધાનિ ।
અધ્યાપનાદિભિરવાપ્ય ધનં ચ ભૂરિ
કર્માણિ માતરલસાઃ કથમાચરેયુઃ ॥ ૧૬॥

આયસ્ય તાવદપિ કર્મ કરોતુ કશ્ચિ-
ત્તેનાપિ માતરધિકં કિમિવાનુભાવ્યમ્ ।
આસ્તે સુખં ય ઇહ ભારતવર્ષસીમ-
ન્યાસ્તે સ કિઞ્ચિદિત ઉત્તરતોઽપસૃત્ય ॥ ૧૭॥

કર્મ ત્યજેમ યદિ નૂનમધઃ પતેમ
યદ્યાચરેમ ન કદાપિ ભવં તરેમ ।
કર્મ ત્યજેદિતિ ચરેદિતિ ચ પ્રવૃત્તાઃ
ભાવેન કેન નિગમા ઇતિ ન પ્રતીમઃ ॥ ૧૮॥

કર્મણ્યકર્મ-વિધિરેષ યદાચરન્તિ
કર્માણિ તત્તદનુબન્ધ-જિહાસયેતિ ।
સત્યં તથાપ્યભિનવો ભવિતા ન બન્ધઃ
પ્રાચીનબન્ધહરણે ક ઇવાભ્યુપાયઃ ॥ ૧૯॥

પ્રારબ્ધકર્મ કિયદારભતે કિયદ્વા
પ્રારપ્સ્યતે કિયદિદં ક ઇવાવધત્તામ્ ।
કાલઃ કિયાનિવ મયા પ્રતિપાલનીયો
યસ્ય ક્ષણાર્ધમપિ કલ્પશતત્વમેતિ ॥ ૨૦॥

પુંસઃ ક્ષણાર્ધમપિ સંસરણાક્ષમસ્ય
સાઙ્ખ્યાદયઃ સરણયો ન વિશન્તિ કર્ણમ્ ।
સઙ્ખ્યાય ગાઙ્ગસિકતાઃ સકલાશ્ચ સૂક્ષ્મા

ભુઙ્ક્ષ્વેતિ વાગિવ મહાક્ષુધયાર્દિતસ્ય ॥ ૨૧॥

ભક્તિસ્તુ કા યદિ ભવેદ્રતિભાવભેદ-
સ્તત્કેવલાન્વયિતયા વિફલૈવ ભક્તિઃ ।
પ્રીતિસ્ત્વયિ ત્રિજગદાત્મનિ કસ્ય નાસ્તિ
સ્વાત્મદ્રુહો ન ખલુ સન્તિ જનાસ્ત્રિલોક્યામ્ ॥ ૨૨॥

આત્મા સમસ્તજગતાં ભવતીતિ સમ્ય-
ગ્વિજ્ઞાય યદ્વિતનુતે ત્વયિ ભાવબન્ધમ્ ।
સા ભક્તિરિત્યભિમતં યદિ સિદ્ધમિષ્ટં
વ્યર્થં વિશેષ્યમલમસ્તુ વિશેષણં નઃ ॥ ૨૩॥

સ્વાત્મેતરત્વમવધાર્ય પરત્વબુદ્ધ્યા
યત્પ્રીયતે ગુરુજનેષ્વિવ સૈવ ભક્તિઃ ।
સ્યાદેતદેવમિયમેવ તુ મે જિહાસ્યા
દ્વૈતભ્રમાત્કિમધિકં ભવબન્ધમૂલમ્ ॥ ૨૪॥

સેવૈવ ભક્તિરિતિ કર્મપથપ્રવેશઃ
સેવ્યપ્રસાદફલકા કિલ કર્મસેવા ।
ધ્યાનપ્રવાહ ઇતિ ચેચ્છ્રવણાત્ તૃતીયઃ
પ્રાગેવ માતરયમાકલિતોઽભ્યુપાયઃ ॥ ૨૫॥

અત્રૈવ દાસ્યસિ વિમુક્તિમથાપિ યાચે
માતઃ શરીરપતનં મણિકર્ણિકાયામ્ ।
અસ્તુ સ્વકૃત્યમનુકમ્પનમીશ્વરાણાં
દાસસ્ય કર્મકરતૈવ તથા સ્વકૃત્યમ્ ॥ ૨૬॥

સદ્યો ભવેત્સુકૃતિનામુપદેશલાભઃ
પાપાત્મનાં બહુતિથે સમયે વ્યતીતે ।
ઇત્યાદિભિઃ કિલ પુરાણવચોભિરમ્બ
વારાણસીમપિ ન યાચિતુમુત્સુકોઽસ્મિ ॥ ૨૭॥

આક્રાન્તમન્તરરિભિઃ મદમત્સરાદ્યૈઃ
ગાત્રં વલીપલિત-રોગશતાનુવિદ્ધમ્ ।
દારૈઃ સુતૈશ્ચ ગૃહમાવૃતમુત્તમર્ણૈઃ
માતઃ કથં ભવતુ મે મનસઃ પ્રસાદઃ ॥ ૨૮॥

ધન્યાઃ કતિ ત્રિભુવને પરમોપભાગ્યં
  સંસારમેવ પરમેશ્વરિ ભાવયન્તઃ ।
આભાસરૂપમવબોધમિમં સમેત્ય
  ક્લિશ્યે કિયત્કિયદહં ત્વમુના ભવેન ॥ ૨૯॥

કા સંસ્કૃતિઃ કિમપચાર-નિબન્ધનેયં
  કીદૃગ્વિધસ્ય તવ કિં ક્ષતમેતયેતિ ।
પ્રશ્ને તુ નાસ્મિ કુશલઃ પ્રતિવક્તુમેવ
  ખેદસ્તુ મે જનનિ કોઽપ્યયમેવમાસ્તે ॥ ૩૦॥

એવં ગતસ્ય મમ સામ્પ્રતમેતદર્હ-
  મત્રેદમૌપયિકમિત્થમિદં ચ સાધ્યમ્ ।
અસ્મિન્પ્રમાણમિદમિત્યપિ બોદ્ધુમમ્બ
  શક્તિર્ન મે ભુવનસાક્ષિણિ કિં કરોમિ ॥ ૩૧॥

ન જ્ઞાયતે મમ હિતં નિતરામુપાયો
  દીનોઽસ્મિ દેવિ સમયાચરણાક્ષમોઽસ્મિ ।
તત્ત્વામનન્યશરણઃ શરણં પ્રપદ્યે
  મીનાક્ષિ વિશ્વજનનીં જનનીં મમૈવ ॥ ૩૨॥

કિઞ્ચિન્મયા શ્રુતિષુ કિઞ્ચિદિવાગમેષુ
  શાસ્ત્રેષુ કિઞ્ચિદુપદેશપથેષુ કિઞ્ચિત્ ।
આઘ્રાતમસ્તિ યદતો ભવતીં વરીતું
  ગોપ્ત્રીતિ કાચિદુદપદ્યત બુદ્ધિરેષા ॥ ૩૩॥

બ્રહ્મૈવમેવમહમેષ તદાસ્ત્યુપાય
  ઇત્યાગમાર્થ-વિધુરાઃ પ્રથમે દયાર્હાઃ ।
ત્વદ્રક્ષકત્વ-ગુણમાત્રવિદો દ્વિતીયા
  ઇત્યર્થયે સદધિકાર-નિરૂપણાય ॥ ૩૪॥

માતઃ કરોષિ મમતાં મયિ યાવદીષ-
  ત્તાવદ્ધતે મમ તતઃ કિમિવાસ્તિ સાધ્યમ્ ।
મામિત્થમિત્થમુપયુઙ્ક્ષ્વ ન વિસ્મરેતિ
  કિં સ્વામિનં ત્વરયતે ક્વચન સ્વભૃત્યઃ ॥ ૩૫॥

ત્યાજ્યં ત્યજાનિ વિહિતં ચ સમાચરાણિ
  નિત્યેષુ શક્તિમનુરુધ્ય હુ વર્તિતવ્યમ્ ।

તદ્બુદ્ધિશક્તિમનુરુધ્ય ન કાર્યશક્તિ-
    મિત્યેતદેવ તુ શિવે વિનિવેદયામિ ॥ ૩૬॥

આત્મૈવ ભાર ઇતિ તં ત્વયિ યો નિધત્તે
    સોઽઙ્ગાનિ કાનિ કલયત્વલસઃ પ્રપત્તેઃ ।
વિશ્વસ્ય સાક્ષિણિ વિલક્ષણલક્ષણા યા
    વિસ્રમ્ભસમ્પદિયમેવ સમસ્તમઙ્ગમ્ ॥ ૩૭॥

ત્વત્પ્રેરણેન મિષતઃ શ્વસતોઽપિ માતઃ
    પ્રામાદિકેઽપિ સતિ કર્મણિ મે ન દોષઃ ।
માત્રૈવ દત્તમશનં ગ્રસતઃ સુતસ્ય
    કો નામ વક્ષ્યતિ શિશોરતિભુક્તિદોષમ્ ॥ ૩૮॥

મુક્તિં સિષાધયિષતાં નિજયૈવ બુદ્ધ્યા
    પ્રારબ્ધકર્મ ભવતુ પ્રતિબન્ધહેતુઃ ।
ત્વામેવ સાધનતયાપિ સમાશ્રિતાનાં
    તુલ્યં તદમ્બ યદિ કસ્તવ વીરવાદઃ ॥ ૩૯॥

પ્રારબ્ધકર્મ ગિરિજે ભવદાશ્રિતાના-
    મન્યત્ર સઙ્ક્રમય નાશય વા સમૂલમ્ ।
મર્ત્યાશ્ચ ખલ્વપિ વિષં વપુષિ પ્રસક્તં
    સઙ્ક્રામયન્તિ પરતોઽપિ ચ નાશયન્તિ ॥ ૪૦॥

ત્વદ્દર્શનશ્રવણ-વન્દનચિન્તનાદિ-
    ષ્વક્ષાણિ દેવિ વિનિયુજ્ય યથાધિકારમ્ ।
રક્ષેત્યસઙ્ખ્ય-ભવસમ્ભૃતયૈવ મૈત્ર્યા
    રુન્ધ્યાં યદિ સ્થિરમમૂન્યધુનૈવ ન સ્યુઃ ॥ ૪૧॥

ત્રાતવ્ય એષ ઇતિ ચેત્કરુણા મયિ સ્યા-
    ત્ત્રાયસ્વ કિં સુકૃતદુષ્કૃતચિન્તયા મે ।
કર્તું જગત્તિરયિતું ચ વિશૃઙ્ખલાયાઃ
    કર્માનુરોધ ઇતિ કં પ્રતિ વઞ્ચનેયમ્ ॥ ૪૨॥

ત્વય્યર્પિતં પ્રથમમપ્પય-યજ્વનૈવ
    સ્વાત્માર્પણં વિદધતા સ્વકુલં સમસ્તમ્ ।
કા ત્વં મહેશિ કુલદાસમુપેક્ષિતું માં
    કો વાનુપાસિતુમહં કુલદેવતાં ત્વામ્ ॥ ૪૩॥

મૌઢ્યાદહં શરણયામિ સુરાન્તરં ચે-
ત્કિં તાવતા સ્વમપિ તસ્ય ભવામિ માતઃ ।
અજ્ઞાનતઃ પરગૃહં પ્રવિશન્પરસ્ય
સ્વત્વં પ્રયાસ્યતિ પશુઃ કિમુ રાજકીયઃ ॥ ૪૪॥

આધાય મૂર્ધનિ વૃથૈવ ભરં મહાન્તં
મૂર્ખા નિમજ્જથ કથં ભવસાગરેઽસ્મિન્ ।
વિન્યસ્ય ભારમખિલં પદયોર્જનન્યા
વિસ્રબ્ધમુત્તરત પલ્વલતુલ્યમેનમ્ ॥ ૪૫॥

ક્વેદં પતિષ્યતિ વપુઃ ક્વ તતો નુ ગમ્યં
કો દણ્ડયિષ્યતિ કિયન્તમનેહસં વા ।
કિં તસ્ય સન્તરણ-સાધનમિત્યનન્તા
ચિન્તા સ્થિતા ત્વયિ શનૈરવતારિતા સા ॥ ૪૬॥

જ્ઞાનં દિશેયમુત તેન વિનોદ્ધરેયં
પ્રારબ્ધમપ્યપલપેયમુતાનુરુન્ધ્યામ્ ।
ઇત્થં સકૃત્પ્રપદનૈક-વશંવદાયા
માતુર્મયિ પ્રવવૃતે મહતીહ ચિન્તા ॥ ૪૭॥

એતજ્જડાજડ-વિવેચનમેતદેવ
ક્ષિત્યાદિતત્વ-પરિશોધનકૌશલં ચ ।
જ્ઞાનં ચ શૈવમિદમાગમ-કોટિલભ્યં
માતુર્યદઙ્ઘ્રિયુગલે નિહિતો મયાત્મા ॥ ૪૮॥

ષટ્ત્રિંશદાવરણ-મધ્યજુષિ ત્વદઙ્ઘ્રૌ
હાલાસ્યનાથદયિતે નિહિતો મયાત્મા ।
ભૂભૂતલત્રિદિવવર્તિષુ કઃ ક્ષમેત
તચ્ચક્ષુષાપિ નિભૃતેન નિરીક્ષિતું મામ્ ॥ ૪૯॥

બન્ધં હરિષ્યસિ સુખં વિતરિષ્યસીતિ
નિશ્ચપ્રચં નિખિલમમ્બ તદાસ્ત એવ ।
સમ્પ્રત્યહં ત્વયિ નિધાય ભરં સમસ્તં
યન્નિર્વૃણોમિ કિમિતોઽપિ મમાપવર્ગે ॥ ૫૦॥

કાશ્યાં નિપાતય વપુઃ શ્વપચાલયે વા

સ્વર્ગં નય ત્વમપવર્ગમધોગતિં વા ।
અદ્યૈવ વા કુરુ દયાં પુનરાયતૌ વા
કઃ સમ્ભ્રમો મમ ધને ધનિનઃ પ્રમાણમ્ ॥ ૫૧॥

નાહં સહે તવ કથાશ્રવણાન્તરાયં
નાહં સહે તવ પદાર્ચનવિચ્યુતિં વા ।
મોક્ષં દિશૈતદવિરુદ્ધમિદં ન ચેત્સ્યા -
ન્નૈવાસ્તુ માતરપવર્ગમહોપસર્ગઃ ॥ ૫૨॥

આચૂડમાચરણમમ્બ તવાનુવાર-
મન્તઃસ્મરન્ભુવનમઙ્ગલમઙ્ગમઙ્ગમ્ ।
આનન્દસાગર-તરઙ્ગપરમ્પરાભિ-
રાન્દોલિતો ન ગણયામિ ગતાન્યહાનિ ॥ ૫૩॥

પાષાણતોઽપિ કઠિને શિરસિ શ્રુતીનાં
પ્રાયઃ પરિક્રમવશાદિવ પાટલાભમ્ ।
અમ્બ સ્મરેયમમૃતાર્ણવ-માથલબ્ધ-
હૈયઙ્ગવીન-સુકુમારમિદં પદં તે ॥ ૫૪॥

યે નામ સન્તિ કતિચિદ્ગુરવસ્ત્રિલોક્યાં
તેષામપિ સ્વયમુપેતવતા ગુરુત્વમ્ ।
પાદેન મૂર્ધ્નિ વિધૃતેન વયં તવામ્બ
સંસારસાગરમિમં સુખમુત્તરામઃ ॥ ૫૫।
સાધારણે સ્મરજયે નિટિલાક્ષિસાધ્યે
ભાગી શિવો ભજતુ નામ યશઃ સમગ્રમ્ ।
વામાઙ્ઘ્રિ-માત્રકલિતે જનનિ ત્વદીયે
કા વા પ્રસક્તિરપિ કાલજયે પુરારેઃ ॥ ૫૬॥

સ્યાત્કોમલં યદિ મનો મમ વિશ્વમાત-
સ્તત્પાદયોર્મૃદુલયોસ્તવ પાદુકાઽસ્તુ ।
સ્યાત્કર્કશં યદિ કરગ્રહણે પુરારે-
રશ્માધિરોહણવિધૌ ભવતૂપયોગઃ ॥ ૫૭॥

પ્રસ્નિગ્ધમુગ્ધ-રુચિપાદતલે ભવત્યા
લગ્નં દૃઢં યદિહ મે હૃદયારવિન્દમ્ ।
એષૈવ સાગ્રભુવન-દ્વિશતીપતિત્વ-

સામ્રાજ્ય-સૂચનકરી તવ પદ્મરેખા ॥ ૫૮॥

અપ્રાકૃતીં મૃદુલતામવિચિન્ત્ય કિઞ્ચિ-
દાલમ્બિતાસિ પદયોઃ સુદૃઢં મયા યત્ ।
તન્મે ભવાર્ણવ-નિમજ્જન-કાતરસ્ય
માતઃ ક્ષમસ્વ મધુરેશ્વરિ બાલકૃત્યમ્ ॥ ૫૯॥

યત્રાનમન્પશુપતિઃ પ્રણયાપરાધે
મન્દં કિલ સ્પૃશતિ ચન્દ્રકલાઞ્ચલેન ।
પુષ્પાર્ચનેઽપિ મૃદિતં પદયોર્યુગં ત-
ન્માતસ્તુદન્તિ ન કથં પરુષા ગિરો મે ॥ ૬૦॥

અવ્યાજ-સુન્દરમનુત્તરમપ્રમેય-
મપ્રાકૃતં પરમમઙ્ગલમઙ્ઘ્રિપદ્મમ્ ।
સન્દર્શયેદપિ સકૃદ્ભવતી દયાર્દ્રા
દ્રષ્ટાસ્મિ કેન તદહં તુ વિલોચનેન ॥ ૬૧॥

દિવ્યા દૃશોઽપિ દિવિષદ્ગ્રહણોચિતાનિ
વસ્તૂનિ કામમવધારયિતું ક્ષમન્તે ।
ત્વન્માત્રવેદ્યવિભવે તવ રૂપધેયે
ત્વદ્ભાવ એવ શરણં પરિશેષિતો નઃ ॥ ૬૨॥

અસ્મિન્મહત્યનવધૌ કિલ કાલચક્રે
ધન્યાસ્તુ યે કતિપયે શુકયોગિમુખ્યાઃ ।
લીનાસ્ત્વદઙ્ઘ્રિયુગલે પરિશુદ્ધસત્વા-
સ્તાનાત્મનસ્તવ નખાનવધારયામઃ ॥ ૬૩॥

આ શૈશવાન્મમતયા કલિતસ્ત્વયાસા-
વાનૃણ્યમમ્બ તવ લબ્ધુમના મૃગાઙ્કઃ ।
સ્વાત્માનમેવ નિયતં બહુધા વિભજ્ય
ત્વત્પાદયોર્વિનિદધે નખરાપદેશાત્ ॥ ૬૪॥

નાન્તઃ પ્રવેશમયતે કિમપિ શ્રુતં મે
નાસ્તિક્યવાદ-શિલયા પ્રતિરુધ્યમાનમ્ ।
તત્પાતયામ્યહમિમાં મહતીમધસ્તા-
ત્પાદોદકેન કિયતા પરદેવતાયાઃ ॥ ૬૫॥

સન્નાહિભિઃ યમભટૈઃ પરિવાર્યમાણે
    મય્યર્ભકે કરુણયા સ્વયમાપતન્ત્યાઃ ।
આકર્ણયેયમપિ નામ વિરામકાલે
    માતસ્તવાઙ્ઘ્રિ-મણિનૂપુરશિઞ્જિતાનિ ॥ ૬૬॥

બ્રહ્મેશકેશવ-મુખૈર્બહુભિઃ કુમારૈઃ
    પર્યાયતઃ પરિગૃહીત-વિમુક્તદેશમ્ ।
ઉત્સઙ્ગમમ્બ તવ દાસ્યસિ મે કદા ત્વં
    માતૃપ્રિયં કિલ જડં સુતમામનન્તિ ॥ ૬૭॥

ઊરૌ શિરસ્તવ નિવેશ્ય દયાવિતીર્ણ-
    સંવ્યાનપલ્લવ-સમીરવિનીતખેદમ્ ।
અત્રૈવ જન્મનિ વિભોઃ પરમોપદેશ-
    માકર્ણયેયમપિ કિં મણિકર્ણિકાયામ્ ॥ ૬૮॥

કાઞ્ચીગુણગ્રથિત-કાઞ્ચનચેલદૃશ્ય-
    ચણ્ડાતકાંશુક-વિભાપરભાગશોભિ ।
પર્યઙ્કમણ્ડલ-પરિષ્કરણં પુરારે-
    ર્ધ્યાયામિ તે વિપુલમમ્બ નિતમ્બબિમ્બમ્ ॥ ૬૯॥

ગર્ભે નિવેશ્ય ભુવનાનિ ચતુર્દશાપિ
    સંરક્ષિતું કલિતનિશ્ચિતયા ભવત્યા ।
પ્રાકારમેવ રચિતં પરિતોઽપિ નૂન-
    મૂહે સુવર્ણમય-મેદુરપટ્ટબન્ધમ્ ॥ ૭૦॥

મુક્તાશ્ચ ખલ્વપિ યદિ ત્રિપુરે ભવત્યાઃ
    સ્તન્યાશયા સ્તનતટં ન પરિત્યજન્તિ ।
અસ્માકમુદ્ભટ-ભવજ્વરતાપિતાના-
    માર્દ્રીભવન્ તુ વદનાનિ કુતો ન હેતોઃ ॥ ૭૧॥

નષ્ટોપલબ્ધમધિગત્ય શિશું ચિરાન્માં
    વાત્સલ્યવિદ્રુતહૃદઃ પરદેવતાયાઃ ।
ક્લિદ્યત્પયોધર-વિનિઃસૃતદુગ્ધબિન્દુ-
    નિષ્યન્દપઙ્ક્તિરિવ દીવ્યતિ હારયષ્ટિઃ ॥ ૭૨॥

યત્તદ્ધનુર્જન-મનોમયમૈક્ષવં તે
    તસ્યાસ્તુ દેવિ હૃદયં મમ મૂલદેશઃ ।

ચાપાધિરોપણવિધૌ ચરણાઞ્ચલેન
 સમ્ભાવ્યતે કિલ સમાક્રમણં કદાચિત્ ॥ ૭૩॥

આસ્થાય દારુણતરં કમપિ સ્વભાવ-
 મત્યન્તદુષ્કૃત-કૃતામપિ શિક્ષણાય ।
ગૃહ્ણાસિ સાયકપદે કુસુમાન્યમૂનિ
 માતઃ સુતેષુ મહતી કિલ રૂક્ષતેયમ્ ॥ ૭૪॥

પાશં સૃણિં ચ કરયોસ્તવ ભાવયન્તઃ
 સંસ્તમ્ભયન્તિ વશયન્તિ ચ સર્વલોકાન્ ।
ચાપં શરં ચ સકૃદમ્બ તવ સ્મરન્તો
 ભૂપાલતાં દધતિ ભોગપથાવતીર્ણાઃ ॥ ૭૫॥

પાશાઙ્કુશૌ તવ કરે પરિચિન્ત્ય રાગ-
 દ્વેષૌ જયન્તિ પરમાર્થવિદસ્તુ ધન્યાઃ ।
એકત્ર ચાપમિતરત્ર શરં ચ મત્વા
 વ્યાવર્તયન્તિ હૃદયં વિષયાન્ધકૂપાત્ ॥ ૭૬॥

ઉત્ક્રાન્તમાન્તરમિદં કરણં જનાના-
 મપ્યેતિ ચન્દ્રમિતિ હિ શ્રુતયો વદન્તિ ।
આસ્તામિદં મમ તુ દેવિ મનોઽધુનૈવ
 લીનં દૃઢં વદનચન્દ્રમસિ ત્વદીયે ॥ ૭૭॥

વિદ્યાત્મનો જનનિ તાવકદન્તપઙ્ક્તે-
 ર્વૈમલ્યમીદૃગિતિ વર્ણયિતું ક્ષમઃ કઃ ।
તત્સમ્ભવા યદમલા વચસાં સવિત્રી
 તન્મૂલકં કવિયશોઽપિ તતસ્તરાં યત્ ॥ ૭૮॥

સ્વચ્છાપિ તે વહતિ યત્કિલ દન્તપઙ્ક્તિઃ
 સ્વચ્છન્દ-નિર્દલિત-દાડિમ-બીજશોભામ્ ।
તન્મે રજોવ્યતિકરાધિક-પાટલિમ્નિ
 ચિત્તે પરં પરિચયાદિતિ ચિન્તયામિ ॥ ૭૯॥

અર્ધં જિતત્રિપુરમમ્બ તવ સ્મિતં ચે-
 દર્ધાન્તરેણ ચ તથા ભવિતવ્યમેવ ।
તચ્ચિન્તયે જનનિ કારણસૂક્ષ્મરૂપ-
 સ્થૂલાત્મક-ત્રિપુરશાન્તિકૃતે સ્મિતં તે ॥ ૮૦॥

મત્ક્લેશદર્શન-પરિદ્રવદન્તરઙ્ગ-
 હૈયઙ્ગવીન-પરિવાહનિભં જનન્યાઃ ।
અન્તસ્તમોપહમનુસ્મરતાં જનાનાં
 મન્દસ્મિતં ભુવનમઙ્ગલમસ્તુ ભૂત્યૈ ॥ ૮૧॥

સાંસિદ્ધિકાનન-સરોરુહદિવ્યગન્ધ-
 સાન્દ્રીકૃતેન્દુ-શકલાકલિતાધિવાસમ્ ।
તામ્બૂલસારમખિલાગમ-બોધસારં
 માતર્વિધેહિ મમ વક્ત્ર-કલાચિકાયામ્ ॥ ૮૨॥

નાસામણિસ્તવ શિવે ચિરસંસ્તવેન
 પ્રત્યાહૃતે મનસિ ભાતિ તપોધનાનામ્ ।
અજ્ઞાનસન્તતિ-નિશાત્યયસૂચનાર્થં
 આવિર્ભવન્ત્યસુર-દેશિકતારકેવ ॥ ૮૩॥

તામ્બૂલગર્ભ-પરિફુલ્લકપોલલક્ષ્ય-
 તાટઙ્કમૌક્તિક-મણિપ્રતિબિમ્બદમ્ભાત્ ।
અસ્તદ્વય-વ્યતિકરામલ-સત્વમાદ્યં
 વર્ણં બિભર્તિ જઠરે તવ વક્ત્રબિમ્બમ્ ॥ ૮૪॥

દત્તે શ્રિયં બહુવિધાં કુશલાનિ દત્તે
 દત્તે પદં સુરપતેરપિ લીલયૈવ ।
ઈદૃગ્વિધામ્બ તવ દૃષ્ટિરિતોऽધિકા વા
 નાદ્યાપિ કર્ણમતિવર્તિતુમીશ્વરીયમ્ ॥ ૮૫॥

પાષાણકૂટકઠિને જનદુર્વિગાહે
 વ્યર્થં મહત્યુપનિષદ્વિપિને પ્રવૃત્તા ।
સેવ્યેત કેન તવ લોચનચન્દ્રિકેય-
 મેનાં નિપાતય સકૃન્મયિ તપ્યમાને ॥ ૮૬॥

કામં શિવેન શમિતં પુનરુજ્જગાર
 દૃષ્ટિસ્તવેતિ કિમિયં જનનિ સ્તુતિસ્તે ।
લીલાપ્રસૂત-પુરુષાર્થ-ચતુષ્ટયાયા-
 સ્તસ્યાઃ પરં તુ સ ભવત્યવયુત્યવાદઃ ॥ ૮૭॥

સોમો જગજ્જનયિતેતિ યદાહ વેદો

નેદં લતાપરમિતિ ભ્રમિતવ્યમાર્યૈઃ ।
યઃ શૈવવામતનુવર્તિ-ભવદૃગાત્મા
ચન્દ્રો જગત્સૃજતિ તત્પર એષ વાદઃ ॥ ૮૮॥

સૂચ્યગ્રવદ્વસુમતીમણુવચ્ચ મેરું
દૃષ્ટિર્યદમ્બ તવ પશ્યતિ દાનશૌણ્ડા ।
દૃષ્ટાસ્ત્વયા વયમપીહ તતઃ સ્મરામો
વેશન્તમેવ ભવસાગરમુત્તરઙ્ગમ્ ॥ ૮૯॥

વાણીનિકેતનતયા ઘનસારગૌરાઃ
કલ્હારકેસરરુચઃ કમલાનુષઙ્ગાત્ ।
માતર્જયન્તિ શરણાગતલોકચેતો-
માલિન્યમાર્જન-વશાદસિતાઃ કટાક્ષાઃ ॥ ૯૦॥

આકર્ણમુલ્લસતિ માતરપાઙ્ગદેશે
કાલાઞ્જનેન ઘટિતા તવ ભાતિ રેખા ।
શૈવાલ-પઙ્ક્તિરિવ સન્તતનિર્જિહાન-
કારુણ્યપૂર-પદવીકલિતાનુબન્ધા ॥ ૯૧॥

વિશ્વં સૃજત્યવતિ હન્તિ ચ યઃ કટાક્ષો
વિશ્વસ્યતાં કથમસૌ ચપલસ્વભાવઃ ।
એષોઽપિ યામનુસરઁલ્લભતે યશાંસિ
તામેવ વિશ્વસિમિ દેવિ તવાનુકમ્પામ્ ॥ ૯૨॥

અર્ધં કલઙ્કરહિતા કરુણૈવ શમ્ભો-
રર્ધં ગુણાસ્તદિતરે સકલાઃ સમેતાઃ ।
ઇત્યમ્બ સમ્પ્રતિ કિલ સ્ફુરિતં રહસ્યં
સમ્પશ્યતો મમ ભવન્મયમૈશમર્ધમ્ ॥ ૯૩॥

અમ્બ ભ્રુવોસ્તવ વિચેષ્ટિતમપ્રમત્તં
સમ્પશ્યતાં નિજનિજાર્થ-નિદેશહેતોઃ ।
તન્મૂલદેશનિહિતા નિભૃતા સુરાણાં
દૃષ્ટિઃ પ્રયાતિ મૃગનાભિ-વિશેષકત્વમ્ ॥ ૯૪॥

સારં કણં કણમઘર્મરુચાં સહસ્રા-
ત્સઙ્ગૃહ્ય નિર્મિતમિદં તવ વક્ત્રબિમ્બમ્ ।
તાવત્સુધાકર-કલઙ્કુકુલાનિ પશ્ચા-

દેકત્ર દેવિ નિહિતાનિ કચાપદેશાત્ ॥ ૯૫॥ (પશ્ચાદન્યત્ર)

વિન્યસ્તમિન્દ્રમણિ-કન્દલસુન્દરેષુ
કેશેષુ તે સ્ફટિકનિર્મલમિન્દુખણ્ડમ્ ।
આધારસઙ્ગતિ-વશાદસિતાયમાન-
મિન્દીવરચ્છદ-વતંસદશાં બિભર્તિ ॥ ૯૬॥

ચિન્તામણિસ્ત્રિભુવનેશ્વરિ કૌસ્તુભશ્ચ
ખ્યાતૌ મણી તવ ગૃહાઙ્ગણકુટ્ટિમસ્થૌ ।
કિં રત્નમન્યદુપલભ્ય કિરીટકોટિં
વાચસ્પતિ-પ્રભૃતયસ્તવ વર્ણયન્તુ ॥ ૯૭॥

પ્રાદુર્ભવત્તરણિ-બિમ્બશતારુણાનિ
પર્યાપ્ત-શીતકિરણાયુત-શીતલાનિ ।
શૃઙ્ગારસાર-પરિવાહમયાનિ માત-
રઙ્ગાનિ કેઽપિ ચરમે જનુષિ સ્મરન્તિ ॥ ૯૮॥

પ્રત્યગ્રકુઙ્કુમ-રસાકલિતાઙ્ગરાગં
પ્રત્યઙ્ગદત્તમણિ-ભૂષણજાલરમ્યમ્ ।
તામ્બૂલપૂરિતમુખં તરુણેન્દુચૂડં
સર્વારુણં કિમપિ વસ્તુ મમાવિરસ્તુ ॥ ૯૯॥

અર્ધં સ્ત્રિયસ્ત્રિભુવને સચરાચરેઽસ્મિ-
ન્નર્ધં પુમાંસ ઇતિ દર્શયિતું ભવત્યા ।
સ્ત્રીપુંસલક્ષણમિદં વપુરાદૃતં ય-
ત્તેનાસિ દેવિ વિદિતા ત્રિજગચ્છરીરા ॥ ૧૦૦॥

નિર્માસિ સંહરસિ નિર્વહસિ ત્રિલોકીં
વૃત્તાન્તમેતમપિ વેત્તિ ન વા મહેશઃ ।
તસ્યેશ્વરસ્ય ગિરિજે તવ સાહચર્યા-
જ્જાતઃ શ્રુતિષ્વપિ જગજ્જનકત્વવાદઃ ॥ ૧૦૧॥

સત્તાસ્યખણ્ડસુખ-સંવિદસિ ત્રિલોકી-
સર્ગસ્થિતિ-પ્રતિહતિષ્વપિ નિર્વ્યપેક્ષા ।
ત્વામન્તરેણ શિવ ઇત્યવશિષ્યતે કિ-
મર્ધં શિવસ્ય ભવતીત્યનભિજ્ઞવાદઃ ॥ ૧૦૨॥

નાસ્મિન્-રવિસ્તપતિ નાત્ર વિવાતિ વાતો
નાસ્ય પ્રવૃત્તિમપિ વેદ જગત્સમસ્તમ્ ।
અન્તઃપુરં તદિદમીદૃશમન્તકારે-
રસ્માદૃશાસ્તુ સુખમત્ર ચરન્તિ બાલાઃ ॥ ૧૦૩॥

ત્વત્સન્નિધાનરહિતો મમ માસ્તુ દેશ-
સ્ત્વત્તત્ત્વબોધરહિતા મમ માસ્તુ વિદ્યા ।
ત્વત્પાદભક્તિરહિતો મમ માસ્તુ વંશ-
સ્ત્વચ્ચિન્તયા વિરહિતં મમ માસ્તુ ચાયુઃ ॥ ૧૦૪॥

ત્વં દેવિ યાદૃગસિ તાદૃગસિ ત્વમીદૃ-
ગેવેતિ વક્તુમપિ બોદ્ધુમપિ ક્ષમઃ કઃ ।
મામેવ તાવદવિદન્નતિપામરોઽહં
માતઃ સ્તુતિં ત્વયિ સમર્પયિતું વિલજ્જે ॥ ૧૦૫॥

કાચિત્કૃતા કૃતિરિતિ ત્વયિ સાઽર્પિતેતિ
કાપિ પ્રમોદકણિકા ન મમાન્તરઙ્ગે ।
મૌઢ્યં મદીયમિહ યદ્વિદિતં મમૈવ
કિં ત્વમ્બ વિશ્વસિમિ દીનશરણ્યતાં તે ॥ ૧૦૬॥

કાલાનપાસ્ય વિષુવાયન-સઙ્ક્રમાદી-
નસ્તઙ્ગતે હિમકરે ચ દિવાકરે ચ ।
અમ્બ સ્મરેયમપિ તે ચરણારવિન્દ-
માનન્દ-લક્ષણમપાસ્ત-સમસ્તભેદમ્ ॥ ૧૦૭॥

ચતુરધ્યાયીરૂપં કલહંસ-વ્યઞ્જનં જગન્માતુઃ ।
અપરબ્રહ્મમયં વપુરન્તઃ શશિખણ્ડ-મણ્ડનમુપાસે ॥ ૧૦૮॥

॥ ઇતિ શ્રી નીલકણ્ઠદીક્ષિતવિરચિતઃ શ્રીઆનન્દસાગરસ્તવઃ સમ્પૂર્ણઃ ॥

Encoded by Sunder Hattangadi

Proofread by Sunder Hattangadi and Rajani Arjun Shankar

*Anandasagarastava*

pdf was typeset on February 17, 2023

Please send corrections to *sanskrit@cheerful.com*